Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 4 | ISSN : 2581- 6306

# नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति

**डॉ0 सन्तोष माझी**
सहाध्यापकः, व्याकरणविभागः राष्ट्रियसंस्कृतविद्यालयः, तिरुपतिः (आ. प्र.)

**Article Info**
Volume 4, Issue 4
Page Number : 48-51

**Publication Issue :**
July-August-2021

**Article History**
Accepted : 03 July 2021
Published : 10 July 2021

**सारांशः-** संस्कृतवाङ्मयस्य व्याकरणग्रन्थेषु सूत्रात्मकं पाणिन्युपज्ञमेव सर्वाङ्गपूर्णमुपलभ्यते। इदं हि प्राचीनवाङ्मयस्यापूर्वनिधिरवश्यं परिसेवनीय संस्कृतप्रपञ्चे विहर्तुकामेन। व्याकरणस्यास्य सुन्दरं सुसङ्गतं सूक्ष्मतमं शब्दप्तकाशनक्षमं रचनाविशेषं दर्शं दर्शं च सर्वे विमर्शनचुञ्चवो विद्वांसो मुक्तकण्ठम् एतत्प्रशंसन्ति। व्याकरणमिदं महर्षिः भगवान् पाणिनिः चन्द्रशेखरं भगवन्तं समाराध्य चतुर्दशसूत्राणि ततोऽवाप्य निरमात्। सूक्ष्मविवेचनपरिपक्वज्ञाननिधिना पाणिनिना स्वीये ग्रन्थे तथा सूत्राणि न्यबध्यन्त यथा तेषु असन्दिग्धावाधितसारवद्बहुतरार्थबोधकाल्पाक्षर-युक्तनिरर्थकवर्णरहितानिन्द्यत्वरूपसूत्रलक्षणम् अन्वितं स्यात्। शिष्टप्रयुक्तानां शब्दानामन्वाख्यानाय प्रवृत्तस्य शब्दशास्त्रस्य परिपूर्णता सम्पिपादयिषुः भगवान् पाणिनिः स्वीये अष्टाध्यायीग्रन्थे अनुवृत्त्यपकर्षसिद्धासिद्धत्व-पौर्वापर्यविभागादिकं सर्वं मनस्याकलय्य सूत्राणि जग्रन्थ। लक्ष्यैकचक्षुष्केण महर्षिणा लक्ष्यसिद्धैकहेतोः त्रिवारमसिद्धत्वमनुशिष्टम् **षत्वतुकोरसिद्धः**[1] (पा.सू . 6.186) **असिद्धवदत्राभात्**[2] (पा.सू. 6.4.22) **पूर्वत्रासिद्धम्**[3] (पा.सू 8.2.1) इति।

**मुख्यशब्दः-** सूत्राणि, व्याकरणग्रन्थः, पाणिनिः, सुपः, समासः, नलोपः।

अष्टमाध्यायस्थे पूर्वत्रासिद्धम् इत्यधिकारे सूत्रमिदं **"नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति"**[4] इति। राजन् शब्दात् तृतीयाद्विवचने भ्याम् प्रत्यये स्वादिष्वसर्वनामस्थाने इति सूत्रेण नलोपे कृते राजभ्यामिति रूपं सिध्यति। राज भ्याम् इति दशायां सुपि च इति सूत्रेण दीर्घे प्राप्ते त्रिपादीस्थस्य नलोपस्य असिद्धत्वबोधनाय प्रवृत्तमिदं सूत्रम्। यद्यपि पूर्वत्रासिद्धम् इति सूत्रेणैव असिद्धत्वं बोधयितुं शक्य तथापि सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति इति न्यायेन सुब्विधौ, स्वरविधौ, संज्ञाविधौ कृति तुग्विधौ एव नलोपोऽसिद्धः नान्यत्र राजाश्व इत्यादौ इत्यर्थबोधनार्थमिदं सूत्रम्। ततश्च राज्ञः अश्वः राजाश्वः इत्यत्र षष्ठीसमासे नलोपोत्तरं सवर्णदीर्घः सिध्यति।

1 पा.सू.- 6/1/86
2 तत्रैव- 6/4/22
3 तत्रैव- 8/2/1
4 तत्रैव- 8/2/2

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अत्र सूत्रे भाष्ये सुब्विधिरित्यत्र समासपरीक्षा कृता। सुपः विधिरिति समासे आश्रिते राजभिः, तक्षभिः इत्यादौ नलोपोत्तर भिसः ऐस्विधिरिति सुब्विधानत्वात् नलोपस्यासिद्धत्वात् ऐस्प्रसङ्गो वार्यते। अपि तु राजभ्यामित्यादौ न सुपो विधिः किन्तु सुपि विधिरिति (सुपि च इति विधीयमानस्य दीर्घस्य) असिद्धत्वं न स्यात्। ततश्च दीर्घप्रसङ्गः।

अतः वार्त्तिके सर्वविभक्त्यन्तः समास आश्रितः। सर्वाभिर्विभक्तिभिरिति यद्यपि लभ्यते तथाऽपि सर्वग्रहणमनेकोपलक्षणम्। अनेकाभिर्विभक्तिभिः समास आश्रीयत इत्यर्थः। सुब्विधिरिति श्रुतेनैकेन पदेन कथमनेकार्थावगम इति चेदुच्यते-सुब्विधिपदस्य प्रवृत्तिनिमित्तमनपेक्ष्य सुब्विधिपरवाच्यो यावानर्थः स सर्वोऽप्याश्रीयते। अथवा सुपः विधिरिति सम्बन्धसामन्यषष्ट्या समास आश्रीयते। सुप्परको विधिरपि सुप्सम्बद्ध एवेति तस्यापि सुर्विधित्वं निर्वाधम्।

संज्ञाविधौ नलोपस्य असिद्धत्वे पञ्चन्नित्यत्र षट् संज्ञैव फलम्, तथा हि - पञ्चन् शब्दस्य लोके नकाररहितस्यैव प्रयोगात् अर्थाल्लोकतो नकारापगमात् नान्तलक्षणा षट्संज्ञा न प्राप्नोति। असिद्धवचनात् संज्ञाविधौ नलोपस्य असिद्धत्वेन संज्ञा सिध्यति।

किन्तु संज्ञाविधौ असिद्धत्वस्य नेदं फलं भवितुमर्हति। लोकप्रयोगात् नकारापगम इति तु न युक्तं, तस्य शास्त्राधीनत्वात्। किञ्च लौकिकापगमस्य शास्त्रेणासिद्धत्वमपि दुर्वचम्। अतो नकारान्तस्य षट्सज्ञायां ततो विभक्तिलुकि , ततो नलोपे आनुपूर्व्यैव पञ्चेत्यत्र षट्संज्ञासिद्धौ संज्ञाविधावसिद्धत्वस्य नेद फलम्। एव तर्हि पञ्चभिः, सप्तभिः इत्याद्युदाहरणं भवति। अत्र च नलोपे कृते तस्यासिद्धत्वाश्रयणेन नान्तलक्षणा षट्संज्ञा सिध्यति। यद्यपि नलोपः प्रातिपदिकान्तस्य इति नलोपः षट्त्रिचतुर्थ्यो हलादिः इति स्वरितविधिशास्त्रं प्रति पूर्वत्रासिद्धम् इत्यनेनैव असिद्धः तथापि नलोपः सुप्स्वर........... इत्येतन्नियमसूत्रमित्यतः स्वरविधौ विशिष्य असिद्धत्वस्य फलमेतत्। अनेन असिद्धत्वेन षट्त्रिचतुर्थो हलादि झल्युपोत्तमम् इति, संज्ञाद्वारा स्वरसिद्धिः।

नलोपः प्रातिपदिकान्तस्य इति सूत्रेण विधीयमानस्य हि नलोपस्य असिद्धत्वमाश्रयणीयम्। नलोप सुप्स्वर......... इति सूत्रे स्वरग्रहणं तु कृतमेवेति स्वरे नलोपस्य असिद्धत्वं सिध्यत्येव। तदेदं स्वरार्थायां षट्संज्ञायामसिद्धत्वं न वक्तव्यम्।

केचित्तु पञ्च ब्राह्मण्यः इत्यत्र पञ्चन् शब्दात् नान्तलक्षणे डीपि प्राप्ते नलोपोत्तरमदन्तलक्षणे टापि च प्राप्ते नलोपस्य असिद्धत्वात् टाब्डीपौ वार्यौ इत्याहुः। "**न षट्स्वस्त्रादिभ्यः**"[5] इत्यत्र स्त्रियां यदुक्तं तन्न भवतीति सामान्येन निषेधाश्रयणात् इत्यपि।

स्त्रियाम् इति सूत्रे भाष्ये प्रातिपदिकस्य स्त्रीत्वे द्योत्ये, स्त्रीत्वे वाच्ये वा स्त्रीप्रत्यया भवन्तीति पक्षः समाश्रायि। स्त्रीसमानाधिकरणात् प्रतिपदिकात् स्त्रीप्रत्यय इति पक्षो नाश्रितः भूतादिष्वतिप्रसङ्गभिया। पञ्च ब्राह्मण्यः इत्यत्र ब्राह्मण्य इति पदे स्त्रीत्वसत्वात् तत्समानाधिकरणात् पञ्चन् शब्दादपि स्त्रीप्रत्यय आपादनीयः। ततश्च अस्य पक्षस्य भाष्यकारैरनाश्रितत्वात् पञ्चन् शब्दान्डीप्टापौ न भवतः। किञ्च अन्तरङ्गे टापि कर्तव्ये बहिरङ्गस्य नलोपस्यासिद्धत्वेन षट्संज्ञाया निर्वाधितत्वात् न षट्स्वस्त्रादिभ्यः इति निषेधः प्रवर्तत एव। अतश्च षट्संज्ञार्थमसिद्धत्वं नाश्रयणीयम्।

[5] अष्टाध्यायी- 4/1/10

एवं तर्हि सञ्ज्ञाविधौ किमुदाहरणमिति चेत् दण्डिदत्तौ दत्तदण्डिनौ इति। अत्र हि दण्डी च दत्तश्च इति विग्रहे द्वन्द्वे समासे कृते, सुपो लुकि, नलोपे च प्रवृत्ते दण्डिशब्दस्य घिसंज्ञायां प्राप्तायां द्वन्द्वे घि इत्यनेन घिसंज्ञकस्य समासे पूर्वमेव प्रयोक्तव्यत्वनियमात् दण्डिदत्तौ इत्येकमेव रूप स्यात् , दत्तदण्डिनौ इत्यपि रूपम् इष्टं न सिध्येत्। नलोपस्य सिद्धत्वे तु दण्डिशब्दस्य नान्तत्वेन घिसंज्ञाऽभावात् पूर्वनिपातनियमाभावे रूपद्वयसिद्धिः।

यद्यपि दण्डी च दत्तश्च इति विग्रहे समासे कृते सति पूर्वनिपाते नलोपः, सति नलोपे घिसंज्ञा, सत्यांच घिसंज्ञया पूर्वनिपातः इति चक्रकं प्राप्तं तथापि द्वन्द्वे घि इति सूत्रस्य यस्य पूर्वपदत्वे घित्वं तत्पूर्वमेव प्रयोक्तव्यमित्यर्थः। ततश्च दण्डिन् शब्दस्य सत्युत्तरपदत्वे न घित्वमिति पूर्वनिपाताभावः। नलोपः सुप्स्वर...... इति सूत्रस्यानारम्भे तु नलोपस्य पूर्वत्रासिद्धम् इत्यनेनैवासिद्धत्वात् नान्तत्वात् पूर्वनिपातः कदापि न स्यात्। संज्ञाविधौ नलोपस्यासिद्धत्वे अश्रीयमाणे नान्तत्वात् न घिसंज्ञाप्रसंङ्ग इति न पूर्वनिपातनियमः। दण्डी च दत्तश्च इति विग्रहे चार्थे द्वन्द्वः इति द्वन्द्वविधानात् उभयोरपि प्रथमान्तत्वात् उपसर्जन पूर्वम् इति पर्यायेण पूर्वनिपाते सति रूपद्वयं सिद्धयति। परं द्वन्द्वे घिसंज्ञकः पूर्वमेव प्रयोक्तव्य इत्यर्थकात् द्वन्द्वे घि इत्यनुशासनात् दण्डिन् शब्दे नलोपोत्तरं घित्वे प्राप्ते नलोपस्य सिद्धत्वे नियमेन दण्डिदत्तौ इत्येव रूपं स्यादिति अनियमो न तु स्यात्। एतत्सूत्रारम्भे तु संज्ञाविधौ नलोपस्यासिद्धत्वे आश्रीयमाणे द्वन्द्वे घि इत्यस्य अप्रसक्तौ पूर्वनिपातस्य अनियमेन पक्षे दण्डिदत्तौ, पक्षे च दत्तदण्डिनौ इति रूपद्वयसिद्धिः।

तुग्विधौ वृत्रहभ्याम् वृत्रहभिः इत्याद्युदाहरणम्। वृत्रहन् भ्याम् इति स्थिते नलोपोत्तरं लुप्तं क्विपमाश्रित्य तुक् प्रसजति। नलोपस्यासिद्धत्वात् न तुक्प्रसङ्गः। भाष्ये तु सन्निपातपरिभाषया तुग्वारितः। वृत्रहन् भ्याम् इत्यनयोः सन्त्रिपातं निमित्तत्वेनाश्रित्य प्रवृत्तो नलोपः तयोः सन्निपातं निघ्नन्नपि पश्चात्तयोः सन्निपातविघातकस्य ह्रस्वस्य पिति कृति तुक् इति विधेः निमित्तं न भवत। ततः सन्निपातपरिभाषामाश्रित्यैव तुग्वारयितुं शक्यः। एवं तर्हि कृति तुग्विधौ इति कृन्निमित्ते तुकि असिद्धत्वं यथा स्यात् छनिमित्तके तुकि मा भूदित्येतदर्थं तुग्ग्रहणम्। तथा हि – ब्रह्मघ्नः छत्रम् इति विग्रहे समासे सति ब्रह्मन् छत्रम् इति जाते नलोपे च सति छे च इति तुक् प्राप्तः। अत्र च नलोपः अन्तर्वर्तिनीं विभक्तिमाश्रित्य प्रवृत्त इति विभक्तिपरकत्वानपेक्षत्वेन न सन्निपातपरिभाषाव्यापारः। ततश्च छे च इति तुकि प्राप्ते पूर्वत्रासिद्धमित्यनेन नलोपस्य असिद्धत्वे प्राप्ते नलोपः सुप्स्वर...... इति सूत्रेण कृति तुक्येव नलोपस्यासिद्धत्वनियमात् छनिमित्तकतुकं प्रति नलोपस्य सिद्धत्वेन तुक् सिध्यति। एवं छनिमित्तकं तुकं साधयितुं कृन्निमित्तके तुकि असिद्धत्वमाश्रितम्।

इत्थं च लोकानुजिघृक्षया लक्ष्यसाधनाय सिद्धमपि सूत्रं असिद्धवत्कृत्य तत्रापि बहूनुपायान् समाश्रित्य भगवान् पाणिनिः शब्दव्युत्पादनशास्त्र व्यवातिष्ठिपत्। इति शम्।

## सहायकग्रन्थसूची


1. **अष्टाध्यायीसहजबोधः** – पुष्पा दीक्षित, पाणिनीयशोधसंस्थान, छत्तीसगढ, 2004.
2. **निघण्टु**, यास्कः, श्रीमत्स्वामिदयानन्दसरस्वरीकृतशब्दानुक्रमणिकया सहितः, वैदिक पुस्तकालय अजमेर.
3. **पाणिनीय अष्टाध्यायीसूत्रपाठः** सम्पा–कृष्णदास अकादमी वारणसी,पं सत्यनारायणशास्त्री खण्डुडी, 2012

4. **प्रौढमनोरमा**, (प्रथमो भागः) भट्टोजिदीक्षित, सम्पा. - श्रीसीतारामशास्त्री, काशी हिन्दू विश्वविद्यालयः, वाराणसी, वैक्रमाब्द - 2021

5. **भूषणसार-परमलघुमञ्जुषयोः सिद्धान्तानां समीक्षा**,डा.राममनोहरमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

6. **लघुशब्दन्दुशेखरः**, नागेशभट्टः, चौखम्बासंस्कृतप्रतिष्ठानदिल्ली - 2001.

7. **लघुशब्देन्दुशेखरः**, वाराणसी, चौखम्बा विद्याभवन, हरिनारायण तिवारी, सम्पा. - 2014.

8. **व्याकरणमहाभाष्यम्,**चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, 2021

9. **वाक्यपदीयम् (ब्रह्मकाण्डम्)**, भर्तृहरिः, चौखम्बा विद्याभवन, वाराणसी, 2006..

10. **वैयाकरणभूषणसारः**, कौण्डभट्टः, चोखम्बासंस्कृतसिरीज्, वाराणसी, 1969.

11. **वैयाकरणसिद्धान्तकौमुदी**, (संश्रिगिरिधरशर्मा, म. म (मोतीलाल बनारसीदास, देहली, 1997.

12. **वैयाकरणसिद्धान्तकौमुदीतत्त्वबोधिनीसहिता**, चौखम्बा विद्याभवन, वाराणसी, 2006.